Name : ..........................................................................................................................

Roll No. : ...............................................

कुल प्रश्नों की संख्या : **18** ] [ कुल मुद्रित पृष्ठों की संख्या : **7**

# N-211512–A

## विषय : संस्कृतम् ( सामान्यम् )

समय : **3 घण्टे** ] [ पूर्णांक : **75**

***निर्देश*** : (*i*) **सर्वे** प्रश्नाः समाधेयाः।

(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न–1** **( अ )** उचित विकल्पं चित्वा लिखत— [1×5=5]

(*i*) 'तीरथगढप्रपातम्' अस्ति—

( *क*) जशपुरनगरे

( *ख*) रायपुरे

( *ग*) बस्तरे

( *घ*) बलरामपुरे

(*ii*) छत्तीसगढस्य 'न्यायधानी' कथ्यते—

( *क*) जगदलपुरम्

( *ख*) बिलासपुरम्

( *ग*) बैकुण्ठपुरम्

( *घ*) अम्बिकापुरम्

(*iii*) 'त्वयि' इति शब्दे विभक्तिः अस्ति—

(*क*) चतुर्थी

(*ख*) षष्ठी

(*ग*) द्वितीया

(*घ*) सप्तमी

(*iv*) 'दिगम्बरः' इत्यस्य सन्धिविच्छेदोऽस्ति—

(*क*) दिग + अम्बरः

(*ख*) दिक् + अम्बरः

(*ग*) दिग् + अम्बरः

(*घ*) दि + गम्बरः

(*v*) 'सुन्दरता' इति शब्दे प्रत्ययः अस्ति—

(*क*) ठक्

(*ख*) ङीप्

(*ग*) तल्

(*घ*) त्वल्

**( ब )** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(गणिते, उपसर्गः, कामये, आधारभूतं, शोधकाः)

(*i*) व्याकरणं तु भाषायाः —— भवति।

(*ii*) वायूनां —— वृक्षाः।

(*iii*) 'परिणमेच्च' इत्यत्र 'परि' —— अस्ति।

(*iv*) शिक्षिका —— निपुणा अस्ति।

(*v*) प्राणिनामार्तिनाशनं —— ।

**( स )** उचितं स्तम्भं सुमेलयत— [1×5=5]

| | **( क )** | | **( ख )** |
|---|---|---|---|
| (*i*) | वरम् | – | विवादेन |
| (*ii*) | अरोचत | – | लघुः परिवार एव |
| (*iii*) | कविना | – | लोट् लकारः |
| (*iv*) | अलम् | – | एकवचनम् |
| (*v*) | करवाणि | – | लङ् लकारः |

**प्रश्न-2** अधः प्रदत्ते संख्ये संस्कृतभाषया लिखत— [1×2=2]

( *क* ) 138

( *ख* ) 108

**प्रश्न-3** निम्नरेखाङ्कितशब्दयोः सन्धिविच्छेदं कृत्वा तयोः नाम्नी लिखत— [1×2=2]

( *क* ) आकाशात् पतितं विमलं जलम् इदम्।

( *ख* ) 'अहङ्करोमि' इति कर्तृभावः।

**प्रश्न-4** निम्नरेखाङ्कितशब्दयोः प्रकृतिं प्रत्ययं च पृथक् कृत्वा लिखत— [1×2=2]

( *क* ) कुमारी वन्दना पुष्पगुच्छैः तस्याः स्वागतं करोति।

( *ख* ) दैनिकं कार्यं मया सम्पन्नम्।

**प्रश्न-5** अधोलिखितवाक्ययोः रेखांकितपदयोः उपसर्गं पृथक् कुरुत— [1×2=2]

( *क* ) पर्वतारोही हिमालयम् आरोहति।

( *ख* ) सा गृहं निवर्तयति स्म।

**प्रश्न-6** वाच्यमवबुध्य नाम लिखत— [1×3=3]

(*क*) सः लेखं लिखति।

(*ख*) छात्रैः स्थीयते।

(*ग*) त्वया कविता श्रूयते।

**प्रश्न-7** विग्रहवाक्यानां सामासिकं पदं लिखत्वा नामानि अपि लिखत— [1×3=3]

(*क*) पञ्चानां वटानां समाहारः

(*ख*) रामश्च लक्ष्मणश्च

(*ग*) चक्रं पाणौ यस्य सः

**प्रश्न-8** अधोलिखित गद्यांशतः कानिचित् त्रीणि अव्ययपदानि चित्वा लिखत— [1×3=3]

यदा वर्षाकाले अरपा नद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयति स्म। एवमेव सा नौकाचालनेऽपि पारङ्गता जाता।

**प्रश्न-9** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

रतनपुरस्य जनपदान्तर्गते शताधिकवर्षपूर्वं 'लगरा' इति ग्रामात् स्वपत्न्या सह जीविकोपार्जनार्थं परसू नाम्नः कैवर्त्यः निर्गतः। तौ अरपानद्या तटे अतिष्ठताम्। अरपायाः तटे एकः लघुग्रामः आसीत्। परसू अरपानद्यां प्रतिदिनं मत्स्याखेटं करोति स्म। कालान्तरेण तस्य भार्या बैसाखा एकां स्वस्थां बालाम् अजनयत्। सा बालिका लावण्यवती आसीत्।

**प्रश्न-10** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

अद्य मां भृशं शिरोवेदना बाधते। रात्रौ अपि न सुखेन शयितो अस्मि। राधिके! गृहकार्यं परित्यज्य इत एव आगच्छ। राधिका—त्वं वारं-वारं मा आह्वयसि, किमहं करोमि? आसन्नं हि दीपमालिकापर्व। गृहेषु दशरुप्यकाणि अपि न सन्ति। किं एवमेव मम जीवनं यास्यति। इति विचार्य विचार्य गहने तमसि निमग्नं मे मनः।

**प्रश्न–11** अधोलिखित श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

माता गुरूतरा भूमेः खादप्युच्चतरः पिता।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

**प्रश्न–12** अधोलिखित श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

सर्वा विद्याः पुरा प्रोक्ताः, संस्कृते हि महर्षिभिः।
तद्विद्यानिधये सेव्यं, संस्कृतं कामधेनुवत्॥

**प्रश्न–13** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(*i*) भारत्यै किं रोचते ?

(*ii*) के रोगाणाम् अपहारकाः ?

(*iii*) लाभानामुत्तमं किम् अस्ति ?

(*iv*) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते ?

(*v*) आत्मानन्देन लिखितग्रन्थस्य नाम किम् ?

(*vi*) मङ्गलयानं कुतः विमुक्तम् ?

**प्रश्न–14** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(*i*) लोकः केन न प्रकाशते ?

(*ii*) आत्मानन्दस्य जन्म कदा अभवत् ?

(*iii*) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति ?

(*iv*) राजा बिलासां कस्मिन् पदे न्ययोजयत् ?

(*v*) कः देशः स्वकीये प्रथमप्रयासे मङ्गलग्रहकक्षम् अलभत ?

(*vi*) संसारे कानि कानि चक्रवत् परिवर्तन्ते ?

**प्रश्न–15** स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1×4=4]

***अथवा***

अत्र अधः सूक्तिवाक्यद्वयं प्रदीयते। सूक्तिवाक्ये पठित्वा अवबुध्य च तयोः भावार्थं हिन्दीभाषायां स्पष्टीकृत्य लिखत—

(*i*) यत्र जीवः, तत्र शिवः।

(*ii*) तपसा विन्दते महत्।

**प्रश्न-16** ( *अ*) भवतः नाम सुरेशः। भवान् शा. उच्च. माध्य. विद्यालय राजपुरे दशम्याः कक्षायाः छात्रः। कतिपयेभ्यः दिनेभ्यः भवान् अस्वस्थताम् अनुभवन् अस्ति, विद्यालयं च गन्तुम् असमर्थोऽस्ति। अतः अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

***अथवा***

अध्ययनशुल्कमुक्तये प्राचार्यं प्रति प्रार्थनापत्रम् अधः प्रदत्तम् अस्ति। लिखितेऽस्मिन् पत्रे रिक्तस्थानानि सन्ति। तानि कोष्ठकप्रदत्तपदानां सहयोगेन पूरयत। [½×8=4]

(अध्ययनशुल्कं, न्यूनः, मम, एका, निवेदयामि, सदस्याः, निर्वाहः, महोदयः)

सेवायाम्

प्राचार्यः ---*(i)*---

शास. उच्च. मा. विद्यालयः

राजपुरम् छत्तीसगढ़म्

विषयः अध्ययनशुल्कमुक्त्यर्थं प्रार्थनापत्रम्।

महोदय,

सविनयं निवेदनम् अस्ति यत् ---*(ii)*--- पिता एकः चतुर्थश्रेणी कर्मचारी अस्ति। तस्य मासिकः आयः अतीवः ---*(iii)*--- अस्ति। येन परिवारस्य ---*(iv)*--- काठिन्येन भवति। मम परिवारे मातापितरौ, द्वौ भ्रातरौ ---*(v)*--- भगिनी च, इति पञ्च ---*(vi)*--- सन्ति। अतः अहं भवन्तं ---*(vii)*--- यत् मम ---*(viii)*--- क्षम्यताम् कृपया।

दिनाङ्क : भवदीयः शिष्यः

20-03-2021 सुरेश कुमारः

( *ब*) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति। व्यवहारे केचन् दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

*प्रश्नाः* [2×2=4]

(*i*) संस्कृतभाषया सारांशं लिखत।

(*ii*) उचितं शीर्षकं लिखत।

***अथवा***

निर्देशानुसारम् उत्तरत— [1×4=4]

(*i*) जनानां शासनं किं कथ्यते?

(*ii*) 'गुणानाम्' इति पदस्य किं विलोमपदम् अस्मिन् गद्यांशे प्रयुक्तम्?

(*iii*) 'जनतन्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(*iv*) कां विना लोकतन्त्रं सुरक्षितं न भवति?

**प्रश्न-17** स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत, यौ प्रश्नपत्रेऽस्मिन् नागतौ स्याताम्। [2½×2=5]

***अथवा***

स्वपाठ्यपुस्तकात् 'वृक्षस्य महत्त्वम्' इति विषये एकं सुभाषित श्लोकं लिखत।

**प्रश्न-18** द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि ***एकः***)— [½×12=6]

(*i*) ग्राम्यजीवनम्

(*ii*) मम प्रदेशः

(*iii*) सदाचारः

(*iv*) महाकविः कालिदासः